# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| | | |
|---|---|---|
| कक्षा -आचार्यद्वितीयवर्षम् (SEM-3) | प्रश्नपत्रम् – ४ | गुणाः - ७० |
| विषयः - फलितज्यौतिषम् | (C.C.- 5.3.9. New ) | |
| दिनाङ्कः - ०७/१२/२०१८ | बृहत्पाराशरहोराशास्त्रम् । | समयः -१०.०० तः १.०० |

### प्रथमान्वितिः

**प्रश्नः १ अधोलिखितयोः कस्यचित् एकस्य व्याख्यां करोतु । (५)**

*(१) षडभिरंशैः क्रमादोजे समेस्याद् व्युत्क्रमान्मुने*
*ग्रहो बालः कुमारश्च युवा वृद्धो मृतस्तथा ॥*
*बाले फलं चतुर्थांशमर्धं कौमारके स्मृतम् ।*
*पूर्णं तु मरणे किञ्चिद् वृद्धे शून्यं मृते ग्रहे ॥*

*(२) मूलत्रिकोणे स्वक्षेत्रे स्वोच्चे वा परमोच्चगे । केन्द्रत्रिकोणलाभस्थे भाग्यकर्माधिपैर्युते ॥*
*सूर्ये बलेन संयुक्ते स्वर्गेऽपि बलैर्युते । तस्मिन् क्षये महत् सौख्यं धनलाभादिकं शुभम् ॥*

**प्रश्नः २ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखतु । (१०)**

*(१) दशाभेदाध्यायः (२) ग्रहावस्थाफलाध्यायः ।*

### द्वितीयान्वितिः

**प्रश्नः ३ अधोलिखितयोः कस्यचित् एकस्य व्याख्यां करोतु । (५)**

*(१) दशेशे तु दशारम्भे तनौ सौम्ययुतेक्षिते । स्वर्क्षतुङ्गसुहृद्भे वा शोभनं तद्दशाफलम् ॥*
*तत्रत्रिकस्यते सत्यस्तमिते नीचशत्रुभे । दशाफलमसत्प्रोक्तमथ वच्मिदशाफलम् ॥*

*(२) चन्द्रस्यान्तर्गते भानौ स्वोच्चे स्वक्षेत्रसंयुते । केन्द्रित्रिकोणे लाभे वा धने बलिनि सोदरे ॥*
*नष्टराज्यधनप्राप्तिर्गृहे कल्याणशोभनम् । मित्रराजप्रसादेन ग्रामभूम्यादिकागमः ॥*

**प्रश्नः ४ अधोलिखितयोः कस्यचित् एकस्य विवर्णनं करोतु । (१०)**

*(१) सूर्यमहादशाफलम् । (२) शुक्रान्तर्दशाफलम् ।*

### तृतीयान्वितिः

**प्रश्नः ५ अधोलिखितयोः कस्यचित् एकस्य व्याख्यां करोतु । (५)**

*(१) दायेशात् केन्द्रराशिस्थे लाभस्थे वा त्रिकोणगे ।*
*विदेशयानं लभते दुष्कीर्तिविविधा तथा ॥*
*पापकर्मरतिर्नित्यं बहुजीवादिहिंसनम् ।*
*विक्रयः क्षेत्रहानिश्च स्थानभ्रंशो मनोव्यथा ॥*

*(२) मन्दस्यान्तर्गते राहौ कलहश्च मनोव्यथा । देहपीडामनस्तापः पुत्रद्वेषो गदाद् भयम्*
*अर्थव्ययो राजभयं विरोधः स्वजनादिभिः । विदेशगमनं चैव गृहक्षेत्रादिनाशनम् ॥*

**प्रश्नः ६ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखतु ।** **( १० )**

*(१) गुर्वन्तर्दशाफलम् । (२) कुजान्तर्दशाफलम् ।*

**चतुर्थान्वितिः**

**प्रश्नः ७ अधोलिखितयोः कस्यचित् एकस्य व्याख्यां करोतु ।** **( ५ )**

*(१) श्वेताश्ववस्त्रमुक्तादि स्वर्णमाणिक्यजं सुखम् ।*
*लभते सुन्दरीं नारीं सितप्रत्यन्तरे नरः ॥*

*(२) ज्ञानं विभवपाण्डित्यं शास्त्रबोधः शिवार्चनम् ।*
*अग्निहोत्रं गुरोर्भक्तिर्गुरोः प्राणगते ध्वजे ॥*

**प्रश्नः ८ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखतु ।** **( १० )**

*(१) कालचक्रदशाऽन्तर्दशाफलाध्यायः । (२) सूक्ष्मदशाफलाध्यायस्य सारांशः ।*

**पञ्चमान्वितिः**

**प्रश्नः ९ अधोलिखितेषु केषाञ्चित् दशप्रश्नानामतिलघूत्तराणि लिखन्तु ।** **( १० )**

*(१) बृहत्पाराशरहोराशास्त्रमते ग्रहाणां अवस्था कति विधा ?*

*(२) विषमराशौकतिकति अंशानन्तरं ग्रहाणां बाल, कुमार, युवा, वृद्ध, मृत, एताः अवस्थाः भवन्ति ?*

*(३) ग्रहाः दीप्ताः कथं भवन्ति ?*

*(४) प्रातः सन्ध्या कति घट्यात्मिका भवति ?*

*(५) प्रातः सन्ध्या सायं सन्ध्या उभयोः घट्यात्मकमानं किम् ?*

*(६) दशारम्भे दशेशाः यदि लग्नगतं भूत्वा स्वोच्च स्वराशि या स्वमित्रक्षेत्रे भवन्ति शुभग्रहेणयुक्तः दृष्टश्च भवन्ति तदा तस्याः दशायाः फलं किम् ?*

*(७) त्रिकस्थानानि कानि ?*

*(८) दशेशतः षडाष्टमरिष्फे शुक्रः भवति तदा फलं किम् ?*

*(९) दशापतितः पाययुक्तसूर्यः , अष्टमद्वादशस्थे भवति तदा फलं किम् ?*

*(१०) शुक्रः यदि द्वितीयसप्तमस्थानस्य अधिपः भवति तदा फलं किम् ?*

*(११) शुक्रः यदि द्वितीयसप्तमस्थानयोः स्वामी तदा अशुभफलं भवति अस्य अशुभफलस्य निवारणं कथं क्रियते ?*

*(१२) दशापतितः केन्द्रत्रिकोण वा लाभस्थाने बुधः भवति चेत् अन्तर्दशायाः फलं किम् ?*

*(१३) वृषतुलाराशेः स्वामीग्रहः कः ?*

*(१४) बुधः कस्मिन् राशौ उच्चः ?*

*(१५) शन्यन्तर्दशायां कुजप्रत्यन्तर्दशाफलं किम् ?*

--oo--